Shabdarnav : An International Peer Reviewed Refereed Research Journal | ISSN - 2395-5104
वर्ष-8, अंक-15, भाग-1, जनवरी-जून, 2022 | Impact Factor : 6.125

# न्यायवैशेषिकदर्शनरीत्या आत्मविचारः

डा. वि.वि.एस.आर.[illegible]*

(शोधपत्रेऽस्मिन् विविधग्रन्थानुसारेण आत्मवादविषयकचर्चा प्रास्तौषम्। तत्र चार्वाकमते विद्यमानाः अंशाः निरूप्य खण्डिताः।)

**उपोद्घातः -** वेदप्रामाण्यं पुरस्कृत्य प्रवृत्तानि दर्शनानि आस्तिकदर्शनानि। तत्र विशिष्य न्यायवैशेषिकदर्शने, यत्र प्रमाणविश्लेषणम्, पदार्थविवेचनञ्चात्यन्तं वैज्ञानिकरीत्या विहितमस्ति। तत्र च अन्यतमे भवतः भारतीयदर्शनेषु एते दर्शने सर्वोच्चस्थानमावहतः। सत्स्वपि अनेकेषु दर्शनेषु न्यायदर्शनं मोक्षप्रदमपि, ईश्वरोपासनारूपा च। अत एवोक्तं श्रीमदुदयनाचार्यैः -

**न्यायचर्चेयमीशस्य मननव्यपदेशभाक्।**
**उपासनैव क्रियते श्रवणानन्तरमागता॥ इति।**[1]

वेदस्य समुचिता व्याख्या तर्काभावे नैव कर्तुं शक्या। अत एव मनुर्निगदति यत् -

**आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना।**
**यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः॥ इति।**[2]

वेदशास्त्राणामविरोधेन तर्केण, ऋषिप्रोक्तेन धर्मोपदेशेन यः अनुसन्धानं कर्तुं शक्नोति, स एव धर्मं ज्ञातुं शक्नोति। वेदानां रक्षणार्थं वेदाङ्गानाम् आवश्यकत्वम्, वेदप्रामाण्यरक्षणार्थं न्यायशास्त्रस्य आवश्यकत्वम्।

गौतममहर्षिकृतन्यायसूत्रम्, कणादमहर्षिकृतवैशेषिकसूत्रम् न्यायवैशेषिकदर्शनसिद्धान्तानां मूलग्रन्थाः। तयोः दर्शनयोः समानतन्त्रत्वेन प्रसिद्धिः वर्तते। षड्दर्शनसमुच्चयादिग्रन्थकाराः प्रायः तुल्यं मतद्वयम् इति अवदन्। वैशेषिकदर्शने द्रव्य-गुण-कर्म-सामान्य-विशेष-समवाय-अभावाः सप्त पदार्थाः अङ्गीकृताः। यद्यपि न्यायदर्शने प्रमाणप्रमेयादिषोडश पदार्थाः अङ्गीकृताः, तथापि सप्तपदार्थानां विषये नैयायिकानां विरोधः नास्ति। तत्र - **एते च पदार्थाः वैशेषिकनये प्रसिद्धाः, नैयायिकानामप्यविरुद्धाः** इति मुक्तावल्यां[3] विद्यमानपङ्क्तिरेव प्रमाणम्। अत्र एते पदार्थाः इत्यस्य, पूर्वं ये सप्त पदार्थाः कारिकायाम् उक्ताः, ते पदार्थाः ग्राह्याः।

कारिका तु इत्थम् -

**द्रव्यं गुणस्तथा कर्म सामान्यं सविशेषकम्।**
**समवायस्तथाऽभावः पदार्थाः सप्त कीर्तिताः॥**[4]

नैयायिकानामविरोधार्थानुगुणमेव प्रशस्तपादभाष्ये द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः सप्त पदार्थाः षोडशपदार्थानामत्रैवान्तर्भूतत्वाद् इति प्रतिपादितम्।

**एवम् अन्नम्भट्टेनापि तर्कसङ्ग्रहग्रन्थस्यान्ते**[5] -

**सर्वेषामपि पदार्थानां यथायथमुक्तेष्वन्तर्भावात् सप्तैव पदार्थाः इति सिद्धम्** इति लिखितम्। अर्थात् षोडशपदार्थानां यथायथम् उक्तेषु सप्तपदार्थेष्वेव अन्तर्भाव इति।

न्यायवैशेषिकदर्शनयोः प्रमाणपूर्वकं सहेतुकं च पदार्थानां यथार्थज्ञानसिद्धिः दृश्यते। एताभ्यां दर्शनाभ्यां न केवलं मोक्षसाधनम्, अपि तु ज्ञानं, बुद्धिवैशद्यम्, इतरशास्त्रोपकारित्वम्, भावस्पष्टता इत्यादिप्रयोजनान्यपि साधयितुं शक्यम्। तदुक्तम् -

**मोहं रुणद्धि विमलीकुरुते च बुद्धिं सूते च संस्कृतपदव्यवहारशक्तिम्।**
**शास्त्रान्तराभ्यसनयोग्यतया युनक्ति तर्कश्रमो न तनुते किमिहोपकारकम्॥** इति।

*सहायकाचार्या, न्यायवैशेषिकविभागः, कर्णाटकसंस्कृतविश्वविद्यालयः, बेङ्गलूरु



Scanned with CamScanner

अस्मिन् लोके तावत् सकलप्रेक्षावन्तः प्रयोजनमुद्दिश्यैव प्रवर्तन्ते। अनयोः दर्शनयोः मुख्यप्रयोजनं तु निःश्रेयसशब्दवाच्यः मोक्षः। स च मोक्षः तत्त्वज्ञानेनैव साध्यः। तथाहि - प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रह-स्थानानां तत्त्वज्ञानाद् निःश्रेयसाधिगमः[6] इति। तथाच पदार्थानां तत्त्वज्ञानेन मोक्षसिद्धिः इति परमकारुणिको भगवान् महर्षिगौतमः आदावसूत्रयत्। अस्य सूत्रस्य व्याख्याने महर्षिवात्स्यायनः तत्त्वज्ञानस्वरूपमाह - आत्मनि आत्मनः सत्त्वज्ञानं तत्त्वज्ञानम्, आत्मभिन्ने शरीरादौ आत्मभिन्नमिति ज्ञानं तत्त्वज्ञानम् इत्यादिरीत्या प्रतिविषयं किं वा विषयानुरूप्येणेत्यर्थः। तथा च विषयस्य यद् यथार्थं स्वरूपं तद्विषयकं ज्ञानं तत्त्वज्ञानं वेदितव्यम्। एतादृशतत्त्वज्ञानेन मोक्षसिद्धिः। मोक्षसाधनत्वम् आत्मसाक्षात्कारस्य विद्यते इत्यत्र इयं श्रुतिः प्रमाणम् - तरति शोकमात्मविद् इति। आत्मनः ज्ञानार्थं त्रिविधाः मार्गाः श्रुतिवाक्येन प्रतिपादिताः - आत्मा वाऽरे द्रष्टव्यः, श्रोतव्यः मन्तव्यः निदिध्यासितव्यः इति। एतेन ज्ञायते यत् आदौ मुमुक्षुणा आत्मदर्शनं कर्तव्यं भवति। यद्यपि आत्मनः विषये आत्मशरीरेन्द्रियादिद्वादशविधप्रमेयम् इति सूत्रकारैः स्वकीये न्यायसूत्रेऽभिहितम्, तथापि आत्मनः प्राधान्यबोधनार्थमात्मविषयत्वमुक्तम् इति भासर्वज्ञः प्रवदति - **तस्योपायस्तत्त्वज्ञानमात्मविषयम्** इति। अर्थात् पूर्वं देहादिषु हेयत्वेन ज्ञानोत्पादवतस्तद्भिन्नात्मनि श्रुत्यादिप्रमाणैः निश्चिते पश्चात्तत्रैव ज्ञानाभ्यासो निःश्रेयसाधनमिति।

न्यायभाष्ये[7] आत्मविषये एवमुक्तं वर्तते - **तत्रात्मा सर्वस्य द्रष्टा, सर्वस्य भोक्ता सर्वज्ञः सर्वानुभवी** इति। एवमात्मविषये तर्कभाषाख्यप्रकरणग्रन्थे [8] केशवमिश्रैः एवमुक्तम् - **आत्मत्वसामान्यवानात्मा, स च देहेन्द्रियादिव्यतिरिक्तः प्रतिशरीरं भिन्नो नित्यो विभुश्च** इति।

अस्यायमर्थः - द्वादशप्रमेयेषु अन्यतमं प्रथमं प्रमेयमात्मा। स च आत्मा आत्मत्वजातिमान्। आत्मा शरीरेन्द्रियादिभिन्नः। सुखादीनि प्रतिशरीरं भिद्यन्ते इत्यतः, सुखाद्यनुभवी आत्मापि प्रतिशरीरं भिद्यते। नित्यः, विभुः, सर्वव्यापी च इति।

**मूलम् - स च मानसप्रत्यक्षः। विप्रतिपत्तौ बुद्ध्यादिविशेषगुणलिङ्गकः। आत्मा तावत् मानसप्रत्यक्षविषयः। तत्र यदि विरोधः तर्हि बुद्ध्यादिविशेषगुणैः (हेतुभिः) साधयितुं शक्यते।**

आत्मनः सत्त्वविषये गौतममहर्षिणा न्यायसूत्रग्रन्थे एवं प्रोक्तम् - **इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गमिति**[9] इति। आत्मनि इन्द्रियार्थसन्निकर्षाभावादात्मा प्रत्यक्षेण न गृह्यते, आत्मसाक्षात्कारे श्रवण-मनन-निदिध्यासनानि तत्त्वज्ञानजनकानि भवन्ति। याज्ञवल्क्योऽपि उपदिशति - श्रोतव्यः श्रुतिवाक्येभ्यो इत्यादिभिः श्रुत्यादिवाक्यैः आत्मनः उपदेशगम्यत्वेऽपि, तस्यानुमानगम्यत्वमपि विद्यते इति सूत्रकारेण पूर्वोक्तसूत्रं प्रोक्तम्। आत्मनोऽनुमितिलिङ्गान्याह - इच्छा-द्वेष-प्रयत्न-सुख-दुःख-ज्ञानम् इति। केशवमिश्रैः तदाधारीकृत्यैव अत्र बुद्ध्यादिविशेषगुणलिङ्गकः इत्युक्तम्। बुद्ध्यादयः इत्यत्र आदिपदेन इच्छा-द्वेषादिः एव उच्यते।

स च आत्मा कथं बुद्ध्यादिगुणलिङ्गकः भवति इति पश्यामः - बुद्ध्यादयः तावद् गुणाः - अनित्यत्वे सति एकेन्द्रियग्राह्यत्वात् , रूपवत्। यथा रूपम् अनित्यम् एकेन्द्रियग्राह्यम्, तथा बुद्ध्यादयः अपि अनित्याः एकेनैव इन्द्रियेण गृह्यन्ते। गुणाः द्रव्यमाश्रित्यैव तिष्ठन्ति। तथाच बुद्ध्यादयोऽपि गुणाः इत्यतः तेऽपि किञ्चिद् द्रव्यमाश्रित्यैव भवन्ति। तत्र द्रव्याणि पृथिव्यप्तेजोवायुराकाशकालदिगात्ममनांसि नवैव। तथा च बुद्ध्यादीनामाश्रयतया आत्मा परिशेषेण साध्यते इत्थम् - **तत्र बुद्ध्यादयो न गुणा भूतानाम्। मानसप्रत्यक्षत्वात्। ये हि भूतानां गुणास्ते न मनसा गृह्यन्ते, यथा रूपादयः। नापि दिक्कालमनसां गुणाः विशेषगुणत्वात्। ये हि**



Scanned with CamScanner

दिक्कालादिगुणाः संख्यादयो न ते विशेषगुणाः। अतो न दिगादिगुणाः। तस्मात् एभ्यः अष्टभ्यो व्यतिरिक्तः बुद्ध्यादीनाम् आश्रयः वक्तव्यः। स एवात्मा।

अस्यायमर्थः - बुद्ध्यादयो गुणाः पृथिव्यप्तेजोवाय्वाकाशेषु पञ्चभूतेषु न वर्तन्ते, यतः बुद्ध्यादयः मनसा गृह्यन्ते, पृथिव्यादीनां गुणाः मनसा नैव गृह्यन्ते, अपि तु इन्द्रियैः गृह्यन्ते। अत एते गुणाः भूतानां गुणाः न भवन्ति। एवं एते गुणाः दिक्कालमनस्सु न वर्तन्ते, यतः दिक्कालादिगुणाः संख्यादयः सामान्यगुणाः, न ते विशेषगुणाः। बुद्ध्यादयस्तु विशेषगुणाः।

**बुद्ध्यादयो स्पर्शान्ताः स्नेहः सांसिद्धिको द्रवः।**
**अदृष्टभावनाशब्दा अमी वैशेषिका गुणाः॥ इति।**[10]

अत एते न दिगादिगुणाः। एभ्यः अष्टभ्यः व्यतिरिक्तः बुद्ध्यादीनाम् आश्रयः आत्मा।

एवं तर्कसंङ्ग्रहे आत्मनो लक्षणमाह - **ज्ञानाधिकरणमात्मा** इति [11] । ज्ञानस्य समवायेनाधिकरणत्वमिति आत्मनः लक्षणम्।

सः द्विविधः परमात्मा जीवात्मा चेति। तत्र परमात्मनः लक्षणं तु **नित्यज्ञानाधिकरणत्वम्।** अत्र **नित्ये**त्यनुपादाने जीवात्मन्यतिव्याप्तिः। समवायेन सुखदुःखादिकं जीवस्य लक्षणं सम्पन्नम्। जीवात्मा प्रतिशरीरं सुखादिवैचित्र्यात् भिन्नः। विभुः। नित्यः।

नवीनग्रन्थः न्यायवैशेषिकसिद्धान्तपरतया प्रसिद्धः यः न्यायसिद्धान्तमुक्तावल्याख्यः[12] तत्र आत्मविषये एवं वर्तते - **आत्मेन्द्रियाद्यधिष्ठाता करणं हि सकर्तृकम्** इति।

अहं प्रत्ययवेद्य आत्मा। तस्य सत्त्वविषये सर्वमतसम्मतिरस्ति। तस्य स्वरूपविषये विप्रतिपत्तिर्वर्तते, केचन शरीरमेव आत्मा, केचन इन्द्रियाण्येव आत्मा, नैयायिकमते तु ज्ञानाधिकरणमात्मा इत्यादिरीत्या। अतः तस्य स्वरूपं विश्वनाथैः मुक्तावल्याम् एवं प्रतिपादितम् -

**इन्द्रियाणां शरीरस्य च परम्परया चैतन्यसम्पादक** इति। तथाहि - इन्द्रियाणां ज्ञानं प्रति जनकत्वात् जनकताख्यपरम्परासम्बन्धेन इन्द्रियाणां ज्ञानं सम्पादयति आत्मा, शरीरस्य चावच्छेदकसम्बन्धेन ज्ञानं प्रति कारणत्वात् अवच्छेदकताख्यपरम्परासम्बन्धेन शरीरस्य ज्ञानं सम्पादयत्यात्मा। इन्द्रियजन्यत्वेन शरीरावच्छेदेनात्मनि ज्ञानि भवति।

आत्मनि प्रमाणं दर्शयति इत्थम् - यद्यपि आत्मनि सुखवानहं दुःखवानहं ज्ञानवानहम् इत्यादि स्वमानसप्रत्यक्षमेव प्रमाणं वर्तते, अतः आत्मा प्रत्यक्षप्रमाणसिद्धः। तथापि न्यायमतविरुद्धप्रतिपत्तिमन्तं - शरीरमेवात्मा - इन्द्रियाण्येवात्मा - इत्यादिरीत्या वदतां चार्वाकादीनां प्रति आत्मनः स्वरूपनिर्णयात्मकप्रथमप्रस्तावे एव शरीरादिभिन्नः सुखवानहमित्यादिप्रतीतेर्विषयः अहं प्रत्ययसंवेद्यः आत्मैव भवतीति तादृशप्रत्यक्षप्रतीतिबलेन प्रतिपादयितुं न शक्यते, यतो हि सुखवानहम् इत्यादिप्रतीतिः सर्वेषां मते सम्भवेन अहं प्रत्ययवेद्यः शरीरमिति चार्वाकमते नास्तिकमते इन्द्रियं मन इति अभिमतत्वात्। अतः अनुमानप्रमाणं दर्शयति - **इन्द्रियादिकं सकर्तृकं करणत्वात् छिदादिकरणवत्** इति। यथा छिदा - छेदनम्, वृक्षादेः छेदनम् तत्करणानां कुठारादीनाम् अचेतनानां कर्तारमन्तरेण न भवति, तथा ज्ञानं प्रति करणानाम् अचेतनानां चक्षुरादीनामपि फलस्य ज्ञानस्य उत्पादकत्वं चेतनात्मानं कर्तारमन्तरेण न सम्भवति। यद्यत् करणं तत्तत् सकर्तृकम्। तथा च इन्द्रियादीनां करणत्वात्, तेऽपि सकर्तृकमेव। कर्ता आत्मा इति कल्प्यते।

अत्र चार्वाकानां मतम् - चार्वाकाः केवलप्रत्यक्षप्रमाणमेव अङ्गीकुर्वन्ति। अहं प्रत्ययवेद्यः आत्मा भवतु नाम, अत्र अहं गच्छामि अहं लिखामि इत्यादिषु प्रत्यक्षं तावत् अहम् इत्यनेन शरीरमेव। अतः एतादृशप्रतीतिबलात् अहं प्रत्ययवेद्यः शरीरमेव, तथा च शरीरमेव आत्मा भवतु, किमर्थमतिरिक्तः आत्मा इति प्रश्ने सति तत्राह -



Scanned with CamScanner

शरीरस्य न चैतन्यं मृतेषु व्यभिचारतः इति।[13]

चार्वाकाणां मते तु चैतन्यं ज्ञानं समवायेन शरीरस्य गुण इति। तथा च समवायेन ज्ञानं प्रति शरीरं कारणम् इति तन्मते कार्यकारणभावः। एवं कार्यकारणबावः यदि उच्यते तर्हि अन्वयव्यभिचारः। तथाहि - मृतेषु शरीरेषु शरीरात्मककारणसत्त्वेऽपि कार्यस्य ज्ञानस्य असत्वात् अन्वयव्यभिचारः। तत्र चार्वाकाः एवं वदन्ति - यथा मन्मते मृतशरीरे व्यभिचारः, तथा त्वन्मतेऽपि समवायेन ज्ञानं प्रति आत्मा कारणम् इत्यत्रापि मुक्तात्मनि ज्ञानाभावादन्वयव्यभिचारः।

तत्र नैयायिकः दूषणान्तरैः चार्वाकमतं खण्डयति - अनुभवस्मरणयोः कश्चन कार्यकारणभावः वर्तते। यदस्माभिरनुभूयते, तदेवानन्तरकाले स्मर्यते। अन्येन अनुभूतमन्येन स्मर्तुं नैव शक्यते। शरीरं प्रतिक्षणम् उत्पद्यते विनश्यति च। यतः शरीरस्यावयवाः ये मांसपिण्डादयस्तेषां वृद्धिः ह्रासः ताभ्यां पूर्वशरीरं नश्यति, नूतनं चोत्पद्यते। तथाच शरीरं प्रतिक्षणं भिद्यते। तथा च भवदुक्तरीत्या शरीरस्य आत्मत्वे, बाल्ये अनुभूतं यद्यत् कन्दुकक्रीडादिकं तस्य वार्धक्ये यौवने च स्मरणं न स्यात्। क्रीडनकाद्यनुभवाश्रयस्य बाल्यशरीरस्य नष्टत्वेन आश्रयनाशादनुभवजन्यसंस्काराणामपि विनष्टत्वात्, स्मरणं नैवोपपद्यते। किन्तु स्मरणं तु भवत्येव, अतः शरीरातिरिक्तानुभवजन्यसंस्काराश्रय आत्मा इति सिद्ध्यति।

न च अनुभवः साक्षात् स्मरणं न जनयति। अपि तु संस्कारद्वारा स्मरणं जनयति। तथाच अनुभवः संस्कारमुत्पादयति, सः संस्कारः आत्मनि स्थिररूपेण तिष्ठति, तेन संस्कारेण स्मरणं भवति। तथाचानुभवः संस्कारद्वारा स्मरणं जनयति। अयं च कार्यकारणभावः मत्पक्षेऽपि शरीरमेवात्मा इति पक्षेऽपि साधयितुं शक्यते। तथाहि - पूर्वं पूर्वं शरीरं यद्बाल्यादि, तत्रोत्पन्ना ये संस्काराः, तैरेव संस्कारैः उत्तरोत्तरोत्पन्ने द्वितीयादियौवनादिशरीरे नूतनाः संस्काराः उत्पादयिष्यन्ते, तथाच परम्परया वृद्धशरीरेऽपि संस्काराणामुत्पत्तिसत्त्वात् तत्र स्मरणं स्यादेव, अतः न स्मरणानुपपत्तिरूपं दूषणम्, तस्मात् शरीरमेव आत्मा इति वाच्यम्। अवयवानां वृद्धिह्रासाभ्यां प्रतिक्षणं शरीरं परिणमति नश्यति नवीनं चोत्पद्यते, तत्र अनन्तरसंख्याकेषु शरीरेषु उत्पद्यमानानामनन्तानां संस्काराणां कल्पनं महद्गौरवम्। मन्मते तु आत्मैक एव बाल्ययौवनवार्धक्ये अनुस्यूतः, तत्र पूर्वानुभवजन्यः संस्कारः भवति, तेन संस्कारेण स्मरणं जायते इति लाघवम्।

ननु शरीरस्य आत्मत्वे अनन्तसंस्कारकल्पनं फलमुखगौरवमेव, तत्तु न दोषाय इति चेत्,न। यदि शरीरमेवात्मा तदा उत्पन्नस्य बालस्य प्रथमे स्तन्यस्य दुग्धस्य पाने प्रवृत्तिर्न स्यात्। यतो हि प्रवृत्तिं प्रति इष्टसाधनताज्ञानं कारणम्, इदं दुग्धपानं मदिष्टस्य जीवनस्य साधनम् इति स्मरणात्मकज्ञानस्य दुग्धपानप्रवृत्तिं प्रति कारणत्वम्। अत्र तु प्रथमस्तन्यपानात् पूर्वं स्तन्यपानानुभवः बालशरीरेण न कृतः, तथाचानुभवाभावात् स्मरणमपि न भवति, तथाच दुग्धपानप्रवृत्त्यव्यवहितपूर्वक्षणे इदं मदिष्टसाधनम् इति स्मरणजनकस्य सहकारिकारणस्य शरीरात्मकात्मनः अभावात्, कः अनुभवः संस्कारमुत्पाद्य इष्टसाधनताज्ञानात्मकं स्मरणमुत्पादयेत्, तथाच स्मरणाभावात् प्रवृत्तिः न स्यात्।

मन्मते तु जन्मान्तरे कृतं यत् स्तन्यपानं तज्जन्यः यः स्तन्यपानं मदिष्टसाधनमित्यनुभवः, तेन अनुभवेन संस्कारः तेन संस्कारेण बाल्ये स्तन्यपानप्रवृत्त्यव्यवहितपूर्वसमये स्तन्यपानं मदिष्टसाधनम् इति स्मरणात्मकज्ञानं जायते। तस्मात् इच्छाद्वारा बालः प्रवर्तते।



Scanned with CamScanner

न च पूर्वजन्मन्यनुभूतमन्यत् युद्धादिकम् अपि अवश्यं बालेन स्मर्यताम्, तत्संस्कारसत्वात् इति वाच्यम्। संस्कारसत्त्वेऽपि ते संस्काराः बाल्ये अनुद्बुद्धाः वर्तन्ते, तस्मिन् जन्मनि यदा कदापि युद्धस्य अवकाशः भवति चेत्, तदानीं युद्धादिसंस्काराणाम् उद्बोधकवशात् तस्य स्मरणं भवति, स्मृतिं प्रति उद्बुद्धसंस्कारस्यैव कारणत्वात्। बाल्ये तु तादृशोद्बोधकाभावात् सः संस्कारः तदानीं न भवति, अतः युद्धादीनां स्मरणाभावात् न प्रवृत्तिः। बाल्ये स्तन्यपाने इष्टसाधनतास्मारकसंसारे तु अगतिकगतिन्यायेन, जीवनान्यथानुपपत्त्या जीवनादृष्टमेव उद्बोधकं कल्प्यते। अतः शरीरातिरिक्तः एव आत्मा इति सिद्धान्तः।

एवं च जननमरणान्यतरस्य संसारस्य अनादित्वात् आत्मनः अनादित्वम्। अनादिभावस्य संसारस्य अनादित्वात् आत्मनः अनादित्वम्। अनादिभावस्य नाशासम्भवात् आत्मनः अपि नाशासम्भवः। तस्माद् आत्मनः नित्यत्वं सिद्ध्यति।

**परिशीलितग्रन्थसूची :**

1. **न्यायभाष्यम्** - महर्षिगौतमकृतन्यायसूत्राणाम् श्रीवात्स्यायनमुनि-प्रणीतम्, प्रसन्नपदापरिभूषितम्, सुधी प्रकाशनम् - वारणासी।
2. **न्यायकुसुमाञ्जलिः** - श्रीमदुदयनाचार्यः, व्याख्याचतुष्टयोपेतः सटिप्पणिः, काशी सस्कृतग्रन्थमाला।
3. **न्यायसिद्धान्तमुक्तावली** - श्री विश्वनाथपञ्चाननः, किरणावलीसमन्विता।
4. **तर्कभाषा** - केशवमिश्रः, हिन्दी व्याख्या, चौखाम्बा सस्कृत सीरीज आफिस्, वारणासी-1
5. **तर्कसङ्ग्रहः** - अन्नम्भट्टः, न्यायबोधिनी-पदकृत्य-दीपिका-किरणावली व्याख्योपेतः।

---

**सन्दर्भ :**

1. न्या.कु.श्लो.सं. ३ पृ. 19
2. म.स्मृ. पृ. ४८५
3. मुक्तावली पृ. १६
4. मुक्तावली पृ. १३
5. त.सं. पृ. १७५
6. न्या.भा. पृ. ४
7. न्या.भा. पृ. २९
8. त.भा. पृ. 145
9. न्या.भा. पृ. 30
10. मुक्तावली पृ. ३७०
11. त.सं. पृ. १३९
12. मुक्तावली पृ. १५६
13. मुक्तावली पृ. १५९

Scanned with CamScanner